ककारादि
श्रीकाली-सहस्र-नाम



प्रकाशक : परा-वाणी आध्यात्मिक शोध-संस्थान
श्रीचण्डी-धाम, अलोपी-देवी मार्ग, प्रयाग-२११००६

उपयोगी पुस्तकें

अद्‌भुत दुर्गा सप्तशती	१००)
अलोप-शङ्करी देवी	५)
अघोर-पन्थ का निरूपण	२५)
अध्यात्म-योग	५)
अक्षय-वट	५)
अनुभूत साधना	२५)
आनन्द-लहरी	१२)
आदि-शङ्कराचार्य अङ्क	१०)
आपदुद्धारक श्रीबटुक-भैरव स्तोत्र	१०)
कमला-कल्पतरु, पुष्प-१, २	८०)
काली-पूजा-पद्धति	१००)
काली-नित्यार्चन	१५)
कृष्ण-साधना	२५)
काली-कल्पतरु	३००)
काश्मीर की वैचारिक परम्परा	१०)
कुण्डलिनी-साधना	४०)
कुम्भ-पर्व अङ्क	१०)
गङ्गा-यमुना-सरस्वती पूजा-अङ्क	५)
गायत्री-कल्पतरु	५०)
गुरु-तन्त्र (हिन्दी टीका सहित)	१५)
गुरु-तत्त्व-दर्शन एवं गुरु-साधना	१५)
चक्र-पूजा	३०)
चक्र-पूजा के स्तोत्र	२५)
छिन्न-मस्ता नित्यार्चन	२५)
तत्त्व-विवेचन	३)
तन्त्रोक्त शब्द-ब्रह्म-साधना	४५)
तारा-कल्पतरु	३५)
दकारादि श्री दुर्गा-सहस्त्र-नाम	२०)
दश महा-विद्या-अष्टोत्तर-शत-नामावली	३०)
दश महा-विद्या-अष्टोत्तर-शत-नाम	३०)
दश महा-विद्या-कवच	३०)
दश महा-विद्या-गायत्री एवं ध्यान	३०)
दश महा-विद्या तन्त्र	६०)
दिव्य योग	६)
दीपावली की पूजा-विधि	१५)
दीपावली विशेषाङ्क	४५)
दीक्षा-प्रकाश	३५)
दुर्गा-साधना	१५)
दुर्गा सप्तशती (पद्यानुवाद)	१५)
दुर्गा सप्तशती (विशुद्ध-संस्करण)	२५)
दुर्गा सप्तशती (बीजात्मक)	१०)
दुर्गा-कल्पतरु (निबन्ध व स्तोत्र-संग्रह)	१५)
दुर्गा-सहस्त्र-नाम-साधना	५)
धन-प्राप्ति के प्रयोग	१०)
धर्म-चर्चा	१०)
धर्म-मार्ग पर	३५)
ध्यान-योग एवं विचार-योग	५)
नवरात्र-कल्पतरु	१००)
नवरात्र-पूजा-पद्धति (वैदिक)	३)
नवग्रह-साधना (सचित्र)	१००)
निष्काम योग एवं कर्म-संन्यास योग	१०)
पञ्च-मकार तथा भाव-त्रय	२०)
पारायण-विधि	६)
प्राण-तोषिणी तन्त्र (सर्ग, धर्म-काण्ड)	५०)
बगला-कल्पतरु	१००)
बगला-साधना	४५)
बाला-स्तव-मञ्जरी	२५)
बाला-कल्पतरु	३५)
बिहार के देवी-मन्दिर	८)

श्रीचण्डी-धाम, अलोपी-देवी मार्ग, प्रयाग-२११००६ फोन: ०५३२-२५०२७८३, ०९४५०२२२७६७

श्रीकालिकायै नमः

श्री श्रीकाली-साधना (११)

साधना-क्रम-सहित भगवती काली के विशिष्ट स्तोत्र

सर्व-साम्राज्य-मेधा-नाम

ककारादि श्रीकाली-सहस्र-नाम-स्तोत्र

विषय-प्रवेश

- भगवती काली के ककारादि सहस्र-नाम अत्यन्त महत्त्व-पूर्ण हैं। सहस्र-नाम के बाद जो विस्तृत फल-श्रुति दी गई है, उससे भी ककारादि सहस्र-नामों का महत्त्व ज्ञात होता है।
- 'ककारादि सहस्र-नामों' का 'पाठ' अथवा 'जपादि' करने के पूर्व 'क'-कार के ध्यान को हृदयङ्गम करना चाहिए। यथा–

क-कारः सर्व-वर्णानां, मूल-प्रकृतिरेव च। कामिनी वा महेशानि!, स्वयं प्रकृति-सुन्दरी।।
माता सा सर्व-देवानां, कैवल्य-पद-दायिनी। ऊर्ध्व-कोणे स्थिता वामा, ब्रह्म-शक्तिरितीरिता।।
वाम-कोणे स्थिता ज्येष्ठा, विष्णु-शक्तिरितीरिता। दक्ष-कोणे स्थिता शक्तिः, श्रीरौद्री संहार-रूपिणी।।
ज्ञानात्मा सा तु चार्वङ्गी, चतुःषष्ट्यात्मकं कुलम्। इच्छा-शक्तिः भवेद् ब्रह्मा, विष्णुश्च ज्ञान-शक्तिमान्।।
क्रिया शक्तिः भवेद् रुद्रः, सर्व-प्रकृति-मूर्तिमान्। आत्म-विद्या-शिवैस्तत्त्वै, पूर्णा मात्रा प्रतिष्ठिता।।
आसनं त्रिपुरा देव्याः, ककारः पञ्च-देवतः। ईश्वरो यस्तु देवेशि! त्रिकोणे तत्त्वं संस्थितः।।
त्रिकोणमेतत् कथितं, योनि-मण्डलमुत्तमम्। कैवल्यं प्रपदे यस्याः, कामिनी सा प्रतीर्तिता।
एषा सा कादि-विद्या, चतुर्वर्ग-फल-प्रदा।।

- 'गुप्तावतार बाबा श्री' द्वारा प्राप्त पाण्डुलिपि के आधार पर यहाँ प्रस्तुत ककारादि श्रीकाली-सहस्र-नाम को पहले विनियोग, फिर ऋष्यादि, तब कर और षडङ्ग-न्यास, ध्यान, मानस-पूजन कर पढ़ना चाहिए। अन्त में 'फल-श्रुति' को पढ़ना चाहिए।
- यदि 'सहस्र-नाम' को एक-से-अधिक बार पढ़ना हो, तो दूसरी आवृत्ति में केवल नामों का पाठ करना चाहिए। यही क्रम तीसरी, चौथी आदि आवृत्तियों में करना चाहिए। अन्तिम आवृत्ति में फल-श्रुति का पुनः पाठ करना चाहिए।

आदि-सम्पादक
'कुल-भूषण' पण्डित रमादत्त शुक्ल

साधना-क्रम

१. बाबाश्री की कृपा से प्राप्त साधना-क्रम

सर्व-प्रथम हाथ जोड़कर '**गुरु-मण्डल**' एवं '**भगवान् गणेश**' को प्रणाम कर **विनियोग** पढ़े। यथा–

ॐ अस्य सर्व-साम्राज्य-मेधा-नाम ककारात्मक श्रीआद्या-काली-नाम-साहस्त्रक-स्तोत्रस्य श्री महा-काल ऋषिः, उष्णिक् छन्दः, श्रीपरमार्थ-दायिनी परमेश्वरी आद्या-महा-काली देवता, क्रीं वीजं, ह्रीं महा-वीजं शक्तिः, श्रीं कीलकं, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं मोक्षादि चतुर्वर्ग साधनार्थं च श्री परमार्थ-दायिनी परमेश्वरी आद्या-महा-काली-प्रीतये पाठे विनियोगः।

इसके बाद **ऋष्यादि-न्यास** करे। यथा–

श्री महा-काल-ऋषये नमः शिरसि, उष्णिक्-छन्दसे नमः मुखे, श्रीपरमार्थ-दायिनी परमेश्वरी आद्या-महा-काली-देवतायै नमः हृदि, क्रीं वीजाय नमः गुह्ये, ह्रीं महा-वीज शक्तये नमः नाभौ, श्रीं कीलकाय नमः पादयोः, मम क्षेम-स्थैर्यायुरारोग्याभि-वृद्ध्यर्थं मोक्षादि चतुर्वर्ग साधनार्थं च श्री परमार्थ-दायिनी परमेश्वरी आद्या-महा-काली-प्रीतये पाठे विनियोगाय नमः अञ्जलौ।

तदनन्तर **कर-न्यास** करे। यथा–

क्रां अंगुष्ठाभ्यां नमः। क्रीं तर्जनीभ्यां स्वाहा। क्रूं मध्यमाभ्यां वषट्। क्रैं अनामिकाभ्यां हुम्। क्रौं कनिष्ठिकाभ्यां वौषट्। क्रः करतल-करपृष्ठाभ्यां फट्।

अब **षडङ्ग-न्यास** करे। यथा–

क्रां हृदयाय नमः। क्रीं शिरसे स्वाहा। क्रूं शिखायै वषट्। क्रैं कवचाय हुम्। क्रौं नेत्र-त्रयाय वौषट्। क्रः अस्त्राय फट्।

तदनन्तर **ध्यान** करे। यथा–

कालिन्दी कज्जलाभिः कलि-कलुष-कटा कोटि-कुट्टा कटायाम्।
कल्पः कल्याण-कारी कवि-वर-रचना कौतुकी कल्प-वृक्षः।।
कस्तूरी-कोष-कान्तिः कुविलय कलिका कामिनीया कराला।
कारुण्यं कल्पयित्वा कलयति कुशलं कालिकाया कटाक्षः।।

फिर **मानस-पूजन** करे। यथा–

ॐ लं पृथ्वी-तत्त्वात्मकं गन्धं श्री परमेश्वरी आद्या-महा-काली-प्रीतये समर्पयामि नमः।
ॐ हं आकाश-तत्त्वात्मकं पुष्पं श्री परमेश्वरी आद्या-महा-काली-प्रीतये समर्पयामि नमः।
ॐ यं वायु-तत्त्वात्मकं धूपं श्री परमेश्वरी आद्या-महा-काली-प्रीतये घ्रापयामि नमः।
ॐ रं अग्नि-तत्त्वात्मकं दीपं श्री परमेश्वरी आद्या-महा-काली-प्रीतये दर्शयामि नमः।
ॐ वं जल-तत्त्वात्मकं नैवेद्यं श्री परमेश्वरी आद्या-महा-काली-प्रीतये निवेदयामि नमः।
ॐ सं सर्व-तत्त्वात्मकं ताम्बूलं श्री परमेश्वरी आद्या-महा-काली-प्रीतये समर्पयामि नमः।

२. प्रचलित साधना-क्रम

सर्व-प्रथम हाथ जोड़कर '**गुरु-मण्डल**' एवं '**भगवान् गणेश**' को प्रणाम कर **विनियोग** पढ़े। यथा–

ॐ अस्य सर्व-साम्राज्य-मेधा-नाम ककारात्मक श्री काली-नाम-साहस्त्रक-स्तोत्रस्य श्री महा-काल ऋषिः, उष्णिक् छन्दः, श्रीदक्षिणा-काली देवता, ह्रीं वीजं, हूं शक्तिः, क्रीं कीलकं, श्रीकाली-वरदानादि-स्वेष्टार्थे पाठे विनियोगः।

इसके बाद **ऋष्यादि-न्यास** करे। यथा–

श्री महा-काल-ऋषये नमः शिरसि, उष्णिक्-छन्दसे नमः मुखे, श्रीदक्षिणा-काली-देवतायै नमः हृदि, ह्रीं वीजाय नमः गुह्ये, हूं शक्तये नमः नाभौ:, क्रीं कीलकाय नमः पादयोः, श्रीकाली-वरदानादि-स्वेष्टार्थे पाठे विनियोगाय नमः सर्वाङ्गे।

तदनन्तर **कर-न्यास** करे। यथा–

क्रां अंगुष्ठाभ्यां नमः। क्रीं तर्जनीभ्यां स्वाहा। क्रूं मध्यमाभ्यां वषट्। क्रैं अनामिकाभ्यां हुम्। क्रौं कनिष्ठिकाभ्यां वौषट्। क्रः करतल-करपृष्ठाभ्यां फट्।

अब **षडङ्ग-न्यास** करे। यथा–

क्रां हृदयाय नमः। क्रीं शिरसे स्वाहा। क्रूं शिखायै वषट्। क्रैं कवचाय हुम्। क्रौं नेत्र-त्रयाय वौषट्। क्रः अस्त्राय फट्।

तदनन्तर **ध्यान** करे। यथा–

शवारूढां महा-भीमां, घोर-दंष्ट्रां हसन्मुखीम्।
चतुर्भुजां खड्ग-मुण्ड-वराऽभय-करां शिवाम्।।
मुण्ड-माला-धरां देवीं, ललज्जिह्वां दिगम्बराम्।
एवं सञ्चिन्तये कालीं, श्मशानालय-वासिनीम्।।

फिर **मानस-पूजन** करे। यथा–

ॐ लं पृथ्वी-तत्त्वात्मकं गन्धं श्री दक्षिणा-कालिका-प्रीतये समर्पयामि नमः।
ॐ हं आकाश-तत्त्वात्मकं पुष्पं श्री दक्षिणा-कालिका-प्रीतये समर्पयामि नमः।
ॐ यं वायु-तत्त्वात्मकं धूपं श्री दक्षिणा-कालिका-प्रीतये घ्रापयामि नमः।
ॐ रं अग्नि-तत्त्वात्मकं दीपं श्री दक्षिणा-कालिका-प्रीतये दर्शयामि नमः।
ॐ वं जल-तत्त्वात्मकं नैवेद्यं श्री दक्षिणा-कालिका-प्रीतये निवेदयामि नमः।
ॐ सं सर्व-तत्त्वात्मकं ताम्बूलं श्री दक्षिणा-कालिका-प्रीतये समर्पयामि नमः।

अब भगवती काली के ककारात्मक सहस्त्र-नाम का पाठ करें।

कुछ लोग ऊपर दिए गए विनियोगादि से पूर्व उस कथा का भी पाठ करते हैं, जिससे इस सहस्त्र-नाम के उद्‌भव का इतिहास ज्ञात होता है। उक्त कथा का अंश निम्न प्रकार है–

।।पूर्व-पीठिका।।

ॐ कैलाश - शिखरे रम्ये, नाना - देव - गणावृते।
नाना - वृक्ष - लता - कीर्णे, नाना - पुष्पैरलंकृते।।१
चतुर्मण्डल - संयुक्ते, शृङ्गार - मण्डपे स्थितम्।
समाधौ सस्थितं शान्तं, क्रीडन्तं योगिनी-प्रियम्।।२
तत्र मौन - धरं दृष्ट्वा, देवी पृच्छति शङ्करम्।
प्रणम्य शिरसा भक्त्या, जगदानन्द - मानसा।।३

।। श्रीदेव्युवाच।।

किं त्वया जप्यते देव?, किं त्वया स्मर्यते सदा?।
सृष्टिः कुत्र विलीनाऽस्ति, पुनः कुत्र प्रजायते?।।४
ब्रह्माण्ड - कारणं यत् तत् , किमाद्यं कारणं महत् ?
मनोरथ-मयी सिद्धिस्तथा वाच्छा-मयी शिव!।।५
तृतीया कल्पना-सिद्धिः, कोटि-सिद्धीश्वरात्मकम्।
शक्ति - पाताष्ट - दशकं, चराचर - पुरी - गतिः।।६
महेन्द्र - जालमिन्द्रादि - जालानां रचना तथा।
अणिमाद्यष्टकं देव!, पर - काय प्रवेशनम्।।७
नवीन - सृष्टि - करणं, समुद्र - शोषणं तथा।
अमायां चन्द्र-सन्दर्शो, दिवा चन्द्र-प्रकाशनम्।।८
चन्द्राष्टकं चाष्ट - दिक्षु, तथा सूर्याष्टकं शिव!।
जले जल-मयत्वं च, वह्नौ वह्नि - मयत्वकम्।।९

ब्रह्म-विष्ण्वादि-निर्माणमिन्द्राणां कारणं तथा।
पादुका-गुटिका-यक्षी, वेताल-पञ्चकं तथा।।१०
रसायनं तथा गुप्तिस्तथैव चाखिलाञ्जनम्।
महा - मधुमती - सिद्धिस्तथा पद्मावती शिव!।।११
तथा भोगवती - सिद्धिर्यावन्त्यः सन्ति सिद्धयः।
केन मन्त्रेण तपसा, कलौ पाप - समाकुले।।१२
आयुष्य - पुण्य - रहिते, कथं भवति तद्वद।।१३

।। श्रीशिव उवाच।।

विना मन्त्रं विना स्तोत्रं, विनैव तपसा प्रिये!।
विना बलिं विना न्यासं, भूत-शुद्धिं विना प्रिये!।।१४
विना ध्यानं विना यन्त्रं, विना पूजादिना प्रिये!।
विना क्लेशादिभिर्देवि!, देह-दुःखादिभिर्विना।।१५
सिद्धिराशु भवेद् येन, तदेव कथ्यते मया।
शून्ये ब्रह्माण्ड-गोले तु, पञ्चाशच्छून्य-मध्यगे।।१६
पञ्च-शून्ये स्थिता तारा, सर्वान्ते कालिका स्मृता।
अनन्त-कोटि-ब्रह्माण्डं, राजदन्ताग्रके शिवे!।।१७
स्थाप्य शून्यालयं कृत्वा, कृष्ण-वर्णं विधाय च।
महा-निर्गुण-रूपा च, वाचातीता परा कला।।१८
क्रीडायां संस्थिता देवी, शून्य-रूपा प्रकल्पयेत्।
सृष्टेरारम्भ-काले तु, दृष्टा छाया तया यदा।।१९
इच्छा-शक्तिस्तु सा जाता, तया कालो विनिर्मितः।
प्रतिबिम्बं तत्र दृष्टं, जाता ज्ञानाभिधा तु सा।।२०
इदमेतत् किं विशिष्टं, जातं विज्ञानकं यदा।
तदा क्रियाऽभिधा जाता, तदिच्छातो महेश्वरि!।।२१
ब्रह्माण्ड-गोले देवेशि!, राज-दन्त-स्थितं च यत्।
सा क्रिया स्थापयामास, स्व-स्व-स्थान-क्रमेण च।।२२
तत्रैव स्वेच्छया देवि!, सामरस्य - परायणा।
तदिच्छा कथ्यते देवि!, यथा - वदवधारय।।२३

युगादि - समये देवि!, शिवं पर - गुणोत्तमम्।
तदिच्छा-निर्गुणं शान्तं, सच्चिदानन्द-विग्रहम्।।२४
शाश्वतं सुन्दरं शुद्धं, सर्व - देव - युतं वरम्।
आदि-नाथं गुणातीतं, काल्या संयुतमीश्वरम्।।२५
विपरीत - रतं देवं, सामरस्य - परायणम्।
पूजार्थमागतं देव - गन्धर्वाऽप्सरसां गणम्।।२६
यक्षिणीं किन्नरी-कन्यामुर्वश्याद्यां तिलोत्तमाम्।
वीक्ष्य तन्मायया प्राह, सुन्दरि! प्राण-वल्लभे !।।२७
त्रैलोक्य-सुन्दरि! प्राण-स्वामिनि! प्राण-रञ्जिनि!
किमागता भवत्यद्य, मम भाग्यार्णवो महान्।।२८
उक्त्वा मौन - धरं शम्भुं, पूजयन्त्यप्सरोगणाः।।२९

।। अप्सरस ऊचुः।।

संसारात् तारितं देव!, त्वया विश्व-जन-प्रिय!।
सृष्टेरारम्भ - कार्यार्थमुद्युक्तोऽसि महा - प्रभो!।।३०
वेश्याकृत्यमिदं देव!, मङ्गलार्थं प्रगायनम्।
प्रयाणोत्सव-काले तु, समारम्भे प्रगायनम्।।३१
युगाद्यारम्भ - कालो हि, वर्तते शिव-शङ्कर!।
इन्द्राणी-कोटयः सन्ति, तस्याः प्रसव-विन्दुतः।।३२
ब्रह्माणी वैष्णवी चैव, माहेशी कोटि-कोटयः।
तव साम - रसानन्द - दर्शनार्थं समुद्भवाः।।३३
सञ्जाताश्चागता देव!, चास्माकं सौख्य-सागर!।
रतिं हित्वा कामिनीनां, नाऽन्यत् सौख्यं महेश्वर!।।३४
सा रतिर्दृश्यतेऽस्माभिर्महत् - सौख्यार्थ-कारिका।
एवमेव तु चास्माभिः, कर्तव्यं भर्तृभिः सह।।३५
एवं श्रुत्वा महा-देवो, ध्यानावस्थित - मानसः।
ध्यानं हित्वा मायया तु, प्रोवाच कालिकां प्रति।।३६

।। श्री महा-काल उवाच।।

कालि! कालि! प्रिये! मुण्ड-मालि! भैरव-नादिनि!।
शिवा-रूप-धरे! क्रूरे!, घोर-दंष्ट्रे! भयानके!।।३७

त्रैलोक्य - क्षोभण-करी-सुन्दर्यः सन्ति तेऽग्रतः।
सुन्दरी-वीक्षणं कर्म, कुरु कालि! प्रिये! शिवे!।।३८
ध्यानं मुञ्च महा-देवि!, ता गच्छन्ति गृहं प्रति।
तव रूपं महा - कालि!, महा-काल-प्रियङ्करम्।।३९
एतासां सुन्दरं रूपं, त्रैलोक्य - प्रिय - कारकम्।
एवं माया-प्रभाविष्टो, महा-कालोऽवदत् तु ताम्।।४०
ततः काल-वचः श्रुत्वा, कालं प्राह च कालिका।।४१

।। श्री काल्युवाच ।।

मायया ऽऽच्छाद्य चात्मानं, निज-स्त्री-रूप-धारिणी।
इतः प्रभृति स्त्री-मात्रं, भविष्यति युगे युगे।।४२
वल्लयाद्यौषधयो देव!, दिवा-वल्ली-स्वरूपताम्।
रात्रौ स्त्री-रूपमासाद्य, क्रीडन्ति च परस्परम्।।४३
अज्ञानं चैव सर्वेषां, भविष्यति युगे युगे।
एवं शापं च दत्वा तु, पुनः प्रोवाच कालिका।। ४४
विपरीत - रतिं कृत्वा, चिन्तयन्ति भजन्ति ये।
तेषां वरं प्रदास्यामि, नित्यं तत्र वसाम्यहम्।। ४५
इत्युक्त्वा कालिका विद्या, तत्रैवान्तरधीयत।
त्रिंशन्निखर्व - षड् - वृन्द - नवत्यर्बुद-कोटयः।।४६
दर्शनार्थं तपस्तेपे, सा वै कुत्र गता प्रिया?
मम प्राण-प्रिया देवी, हा-हा प्राण-प्रिये! शिवे!।।४७
किं करोमि? क्व गच्छामि? इत्येवं भ्रम-संकुलः।
तदा काल्याः दया जाता, मम चिन्ता-परः शिवः।।४८
यन्त्र-प्रस्तार-बुद्धिस्तु, काल्या दत्ताऽति-सत्त्वरम्।
यन्त्र-यागं तदारभ्य, पूर्वं विन्दुत्व-गोचरम्।।४९
श्रीचक्र - यन्त्र - प्रस्तार - रचनाभ्यास - तत्परः।
इतस्ततो भ्राम्यमाणस्त्रैलोक्यं चक्र-मध्यगम्।।५०
चक्र - पार - दर्शनार्थं, कोट्यर्बुद - युगं गतम्।
भक्त-प्राण-प्रिया देवी, महा-श्रीचक्र-नायिका।।५१

तत्र विन्दौ परं रूपं, सुन्दरं सु - मनोहरम्।
रूपं जातं महेशानि!, जाग्रत् त्रिपुर-सुन्दरी।।५२
रूपं दृष्ट्वा महा - देवो, राज - राजेश्वरोऽभवत्।
तस्याः कटाक्ष-मात्रेण, तस्या रूप-धरः शिवः।।५३
विना शृङ्गार - संयुक्ता, तदा जाता महेश्वरी।
विना काल्यंशतो देवि!, जगत्-स्थावर-जङ्गमम्।।५४
न शृङ्गारो न शक्तित्वं, क्वापि नास्ति महेश्वरि!।
सुन्दर्य्या प्रार्थिता काली, तुष्टा प्रोवाच कालिका।।५५
सर्वासां नेत्र - केशे च, ममांशोऽत्र भविष्यति।
पूर्वावस्थासु देवेशि!, ममांशस्तिष्ठति प्रिये!।।५६
साऽवस्था तरुणाख्या तु, तदन्ते नैव तिष्ठति।
मद् - भक्तानां महेशानि!, सदा तिष्ठति निश्चितम्।।५७
शक्तिस्तु कुण्ठिता जाता, तथा रूपं न सुन्दरम्।
चिन्ताविष्टा तु मलिना, जाता तत्र तु सुन्दरी।।५८
क्षणं स्थित्वा ध्यान - परा, काली - चिन्तन - तत्परा।
तदा काली प्रसन्नाऽभूत्, क्षणार्धेन महेश्वरि!।।५९
वरं ब्रूहि वरं ब्रूहि, वरं ब्रूहीति सादरम्!।६०

।। श्रीसुन्दर्य्युवाच ।।

मम शक्तिं परां देहि, वरोऽयं प्रार्थ्यते मया।
तादृगुपायं कथय, येन शक्तिर्भविष्यति।।६१

।। श्रीकाल्युवाच ।।

मम नाम - साहस्त्रं च, मया पूर्वं विनिर्मितम्।
मत्-स्वरूपं ककाराद्यं, मेधा-साम्राज्य-नामकम्।।६२
वरदानाभिधं नाम, क्षणाद्धर्द्धाद् वर - दायकम्।
तत्पठस्व महा - माये!, तव शक्तिर्भविष्यति।।६३
ततः प्रभृति श्रीविद्या, तन्नाम - पाठ - तत्परा।
तदेव नाम-साहस्त्रं, सुन्दरी-शक्ति-दायकम्।।६४

कथ्यते परया भक्तया, साधयस्व महेश्वरि!।
मद्यैर्मांसैस्तथा शुक्रैः, सर्व - रक्तैरपि प्रिये!।।६५
तर्पयेत् पूजयेत् कालीं, विपरीत - रतिं चरेत्।
विपरीत - रतौ देवि!, काली तिष्ठति नित्यशः।।६६
माध्वीक-शुक्र-पुष्पा तु, मैथुनानन्द - रागिणी।
वैष्णवी व्यापिका विद्या, श्मशान - वासिनी परा।।६७
वीर - साधन - सन्तुष्टा, वीरास्फाल - निनादिनी।
शिवा-बलि-प्रहृष्टात्मा, शिवा-रूपाद्य-चण्डिका।।६८
कामानन्द - प्रिया स्तोत्र - प्रिया चात्युग्र - मानसा।
ब्रह्मानन्द - परा सान्द्र - मैथुनानन्द - तोषिणी।।६९
योगीन्द्र - हृदयागारा, दिवा - निशि - विपर्यया।
क्षण-तुष्टा च प्रत्यक्षा, दन्त-माला-जप-प्रिया।।७०
खड्ग-हस्तो मुक्त-केशो, दिगम्बर-विभूषितः।
शय्यास्थ-चुम्बनानन्दी, वेश्या-सङ्ग-परायणः।।७१
पठेत् सहस्र-नामाख्यं, मेधा - साम्राज्य - नामकम्।
यथा दिव्यामृतैर्देवा, प्रसन्नाः क्षण-मात्रतः।।७२
तथाऽनेन महा - काली, प्रसन्ना पाठ - मात्रतः।
कथ्यते नाम-साहस्त्रं, सावधान-मनाः शृणु।।७३

।। नाम-सहस्रम् ।।

ॐ क्रीं-काली[१] क्रूं-कराली[२] च, कल्याणी[३] कमला[४] कला[५]।
कलावती[६] कलाढ्या[७] च, कला-पूज्या[८] कलात्मिका[९]।।१
कला-हृष्टा[१०] कला-पुष्टा[११], कला-मस्ता[१२] कलाकरा[१३]।
कला-कोटि-समाभासा[१४], कला-कोटि-प्रपूजिता[१५]।।२
कला-मयी[१६] कलाधारा[१७], कलापारा[१८] कला-गमा[१९]।
कलाराध्या[२०] कमलिनी[२१], ककारा[२२] करुणाकरा[२३]।।३
ककार - वर्ण-सर्वाङ्गी[२४], कला - कोटि - विभूषिता[२५]।
ककार - कोटि - गुणिता[२६], ककार - कोटि - भूषणा[२७]।।४

ककार - वर्ण - हृदया[२८], ककार - मनु - मण्डिता[२९]।
ककार - वर्ण - निलया[३०], काक - शब्द - परायणा[३१]।।५
ककार - वर्ण - मुकुटा[३२], ककार - वर्ण - भूषणा[३३]।
ककार - वर्ण - रूपा[३४] च, कक-शब्द - परायणा[३५]।।६
कक - वीरास्फाल - रता[३६], कमलाकर - पूजिता[३७]।
कमलाकर - नाथा[३८] च, कमलाकर - रूप - धृक्[३९]।।७
कमलाकर - सिद्धिस्था[४०], कमलाकर - पारदा[४१]।
कमलाकर - मध्यस्था[४२], कमलाकर - तोषिता[४३]।।८
कथङ्कार - पदालापा[४४], कथङ्कार - परायणा[४५]।
कथङ्कार - पदान्तस्था[४६], कथङ्कार - पदार्थ - भू:[४७]।।९
कमलाक्षी[४८] कमलजा[४९], कमलाक्ष - प्रपूजिता[५०]।
कमलाक्ष - वरोद्युक्ता[५१], ककारा[५२] कर्बुराक्षरा[५३]।।१०
कर-तारा[५४] करच्छिन्ना[५५], कर - श्यामा[५६] करार्णवा[५७]।
कर - पूज्या[५८] कर - रता[५९], करदा[६०] कर-पूजिता[६१]।।११
कर-तोया[६२] करामर्षा[६३], कर्म - नाशा[६४] कर-प्रिया[६५]।
कर - प्राणा[६६] करकजा[६७], करका[६८] करकान्तरा[६९]।।१२
करकाचल - रूपा[७०] च, करकाचल - शोभिनी[७१]।
करकाचल - पुत्री[७२] च, करकाचल - तोषिता[७३]।।१३
करकाचल - गेहस्था[७४], करकाचल - रक्षिणी[७५]।
करकाचल - सम्मान्या[७६], करकाचल - कारिणी[७७]।।१४
करकाचल - वर्षाढ्या[७८], करकाचल - रञ्जिता[७९]।
करकाचल - कान्तारा[८०], करकाचल - मालिनी[८१]।।१५
करकाचल - भोज्या[८२] च, करामलक - रूपिणी[८३]।
करामलक - संस्था[८४] च, करामलक - सिद्धिदा[८५]।।१६
करामलक - सम्पूज्या[८६], करामलक - तारिणी[८७]।
करामलक - काली[८८] च, करामलक - रोचिनी[८९]।।१७

करामलक - माता[९०] च, करामलक - सेविनी[९१]।
करामलक - वद् - ध्येया[९२], करामलक - दायिनी[९३]।।१८
कञ्ज - नेत्रा[९४] कञ्ज - मतिः[९५], कञ्जस्था[९६] कञ्ज - धारिणी[९७]।
कञ्ज-माला-प्रिय-करी[९८], कञ्ज-रूपा[९९] च कञ्जजा[१००]।।१९
कञ्ज - जातिः[१०१] कञ्ज - गतिः[१०२], कञ्ज - होम - परायणा[१०३]।
कञ्ज - मण्डल - मध्यस्था[१०४], कञ्जाभरण - भूषिता[१०५]।।२०
कञ्ज - सम्मान - निरता[१०६], कञ्जोत्पत्ति - परायणा[१०७]।
कञ्ज - राशि - समाकारा[१०८], कञ्जारण्य - निवासिनी[१०९]।।२१
करञ्ज - वृक्ष - मध्यस्था[११०], करञ्ज - वृक्ष - वासिनी[१११]।
करञ्ज - फल - भूषाढ्या[११२], करञ्जारण्य - वासिनी[११३]।।२२
करञ्ज - मालाभरणा[११४], करवाल - परायणा[११५]।
करवाल - प्रहृष्टात्मा[११६], करवाल - प्रिया - गतिः[११७]।।२३
करवाल - प्रिया - कन्था[११८], करवाल - प्रहारिणी[११९]।
करवाल - मयी - कर्मा[१२०], करवाल - क्रिया - करा[१२१]।।२४
कबन्ध - मालाभरणा[१२२], कबन्ध - राशि - मध्यगा[१२३]।
कबन्धारूढ - संस्थाना[१२४], कबन्धानन्त - भूषिता[१२५]।।२५
कबन्ध - नाद - सन्तुष्टा[१२६], कबन्धासन - धारिणी[१२७]।
कबन्ध - गृह - मध्यस्था[१२८], कबन्ध - वन - वासिनी[१२९]।।२६
कबन्ध-काञ्ची - करणी[१३०], कबन्ध - राशि - भूषणा[१३१]।
कबन्ध - माला - जयदा[१३२], कबन्ध - देह - वासिनी[१३३]।।२७
कबन्धासन - मान्या[१३४] च, कपाल - माल्य - धारिणी[१३५]।
कपाल - माला - मध्यस्था[१३६], कपाल - व्रत - तोषिता[१३७]।।२८
कपाल - दीप - सन्तुष्टा[१३८], कपाल - दीप - रूपिणी[१३९]।
कपाल - दीप -वरदा[१४०], कपाल-कज्जल-स्थिता[१४१]।।२९
कपाल - माला - जयदा[१४२], कपाल - जप - तोषिणी[१४३]।
कपाल - सिद्धि - संहृष्टा[१४४], कपाल-भोजनोद्यता[१४५]।।३०

कपाल - व्रत - संस्थाना[१४६], कपाल-कमलालया[१४७]।
कवित्वामृत - सारा[१४८] च, कवित्वामृत - सागरा[१४९]।।३१
कवित्व-सिद्धि-संहृष्टा[१५०], कवित्व-दान-कारिणी[१५१]।
कवि-पूज्या[१५२] कवि-गतिः[१५३], कवि-रूपा[१५४] कवि-प्रिया।।[१५५]३२
कवि - ब्रह्मानन्द - रूपा[१५६], कवित्व-व्रत-तोषिता[१५७]।
कवि-मानस-संस्थाना[१५८], कवि-वाञ्छा - प्रपूरिणी[१५९]।।३३
कवि-कण्ठ-स्थिता[१६०] कं-ह्रीं-कं-कं-कं कवि-पूर्तिदा[१६१]।
कज्जला[१६२] कज्जलादान - मानसा[१६३] कज्जल - प्रिया[१६४]।।३४
कपाल - कज्जल - समा[१६५], कज्जलेश - प्रपूजिता[१६६]।
कज्जलार्णव - मध्यस्था[१६७], कज्जलानन्त - रूपिणी[१६८]।।३५
कज्जल - प्रिय - सन्तुष्टा[१६९], कज्जल - प्रिय-तोषिणी[१७०]।
कपाल - मालाभरणा[१७१], कपाल - कर - भूषणा[१७२]।।३६
कपाल - कर - भूषाढ्या[१७३], कपाल - चक्र-मण्डिता[१७४]।
कपाल - कोटि - निलया[१७५], कपाल - दुर्ग - कारिणी[१७६]।।३७
कपाल - गिरि - संस्थाना[१७७], कपाल-चक्र - वासिनी[१७८]।
कपाल - पात्र - सन्तुष्टा[१७९], कपालार्घ्य - परायणा[१८०]।।३८
कपालार्घ्य - प्रिय - प्राणा[१८१], कपालार्घ्य - वरोद्यता[१८२]।
कपाल - चक्र - रूपा[१८३] च, कपाल - रूप - मात्रगा[१८४]।।३९
कदली[१९५] कदली - रूपा[१८६], कदली - वन - वासिनी[१८७]।
कदली - पुष्प - संप्रीता[१८८], कदली - फल - मानसा[१८९]।।४०
कदली - होम - सन्तुष्टा[१९०], कदली - दर्शनोद्यता[१९१]।
कदली - गर्भ - मध्यस्था[१९२], कदली - वन - सुन्दरी[१९३]।।४१
कदम्ब - पुष्प - निलया[१९४], कदम्ब - वन - मध्यगा[१९५]।
कदम्ब - कुसुमामोदा[१९६], कदम्ब - वन - तोषिणी[१९७]।।४२
कदम्ब - पुष्प - सम्पूज्या[१९८], कदम्ब - पुष्प - होमदा[१९९]।
कदम्ब - पुष्प - मध्यस्था[२००], कदम्ब - फल - भोजिनी[२०१]।।४३

कदम्ब - काननान्तस्था[२०२], कदम्बाचल - वासिनी[२०३]।
कक्षपा[२०४] कक्षपाराध्या[२०५], कक्षपासन - संस्थिता[२०६]।।४४
कर्ण-पूरा[२०७] कर्ण - नासा[२०८], कर्णाढ्या[२०९] काल - भैरवी[२१०]।
कल - प्रीता[२११] कलहदा[२१२], कलहा[२१३] कलहातुरा[२१४]।।४५
कर्ण - यक्षी[२१५] कर्ण-वार्ता[२१६], कथिनी[२१७] कर्ण-सुन्दरी[२१८]।
कर्ण - पिशाचिनी[२१९] कर्ण - मञ्जरी[२२०] कवि-कक्षदा[२२१]।।४६
कवि - कक्ष - विरूपाढ्या[२२२], कवि-कक्ष-स्वरूपिणी[२२३]।
कस्तूरी - मृग - संस्थाना[२२४], कस्तूरी - मृग - रूपिणी[२२५]।।४७
कस्तूरी - मृग - सन्तोषा[२२६], कस्तूरी - मृग - मध्यगा[२२७]।
कस्तूरी - रस - नीलाङ्गी[२२८], कस्तूरी - गन्ध - तोषिता[२२९]।।४८
कस्तूरी - पूजक - प्राणा[२३०], कस्तूरी - पूजक - प्रिया[२३१]।
कस्तूरी - प्रेम - सन्तुष्टा[२३२], कस्तूरी - प्राण - धारिणी[२३३]।।४९
कस्तूरी - पूजकानन्दा[२३४], कस्तूरी - गन्ध - रूपिणी[२३५]।
कस्तूरी - मालिका - रूपा[२३६], कस्तूरी - भोजन - प्रिया[२३७]।।५०
कस्तूरी - तिलकानन्दा[२३८], कस्तूरी - तिलक - प्रिया[२३९]।
कस्तूरी - होम - सन्तुष्टा[२४०], कस्तूरी - तर्पणोद्यता[२४१]।।५१
कस्तूरी - मार्जनोद्युक्ता[२४२], कस्तूरी - चक्र - पूजिता[२४३]।
कस्तूरी - पुष्प - सम्पूज्या[२४४], कस्तूरी - चर्वणोद्यता[२४५]।।५२
कस्तूरी - गर्भ - मध्यस्था[२४६], कस्तूरी-वस्त्र-धारिणी[२४७]।
कस्तूरी-कामोद - रता[२४८], कस्तूरी - वन - वासिनी[२४९]।।५३
कस्तूरी - वन - संरक्षा[२५०], कस्तूरी - प्रेम - धारिणी[२५१]।
कस्तूरी - शक्ति - निलया[२५२], कस्तूरी-शक्ति-कुण्डगा[२५३]।।५४
कस्तूरी - कुण्ड-संस्नाता[२५४], कस्तूरी-कुण्ड-मज्जना[२५५]।
कस्तूर्यर्घ्यद - सन्तुष्टा[२५६], कस्तूरी - जीव - धारिणी[२५७]।।५५
कस्तूरी - परमामोदा[२५८], कस्तूरी - जीवन - क्षमा[२५९]।
कस्तूरी - जाति-भावस्था[२६०], कस्तूरी-गन्ध-चुम्बना[२६१]।।५६

कस्तूरी - गन्ध - संशोभा - विराजित - कपाल - भूः[२६२-६४]।
कस्तूरी - मदनान्तस्था[२६५], कस्तूरी - मद - हर्षदा[२६६]।।५७
कस्तूरी - कविता-नाढ्या[२६७], कस्तूरी-गृह-मध्यगा[२६८]।
कस्तूरी - स्पर्शक - प्राणा[२६९], कस्तूरी - निन्दकान्तका[२७०]।।५८
कस्तूर्यामोद - रसिका[२७१], कस्तूरी - क्रीडनोद्यता[२७२]।
कस्तूरी - दान - निरता[२७३], कस्तूरी - वर - दायिनी[२७४]।।५९
कस्तूरी - स्थापनासक्ता[२७५], कस्तूरी - स्थान - रञ्जिनी[२७६]।
कस्तूरी - कुशल - प्रश्ना[२७७], कस्तूरी - स्तुति - वन्दिता[२७८]।।६०
कस्तूरी - वन्दकाराध्या[२७९], कस्तूरी - स्थान - वासिनी[२८०]।
कह-रूपा[२८१] कहाढ्या[२८२] च, कहानन्दा[२८३] कहात्म-भूः[२८४]।।६१
कह-पूज्या[२८५] कहेत्याख्या[२८६], कह-हेषा[२८७] कहात्मिका[२८८]।
कह - माला-कण्ठ - भूषा[२८९-९०], कह-मन्त्र-जपोद्यता[२९१]।।६२
कह - नाम - स्मृति - परा[२९२], कह - नाम - परायणा[२९३]।
कह - पारायण - रता[२९४], कह - देवी[२९५] कहेश्वरी[२९६]।।६३
कह - हेतुः[२९७] कहानन्दा[२९८], कह - नाद - परायणा[२९९]।
कह - माता[३००] कहान्तस्था[३०१], कह-मन्त्रा[३०२] कहेश्वरी[३०३]।६४
कह - गेया[३०४] कहाराध्या[३०५], कह - ध्यान - परायणा[३०६]।
कह - तन्त्रा[३०७] कह-कहा[३०८], कह-चर्या-परायणा[३०९]।। ६५
कहाचारा[३१०] कह - गतिः[३११], कह - ताण्डव - कारिणी[३१२]।
कहारण्या[३१३] कह - मतिः[३१४] कह - शक्ति - परायणा[३१५]।।६६
कह - राज्य - रता[३१६] कर्म-साक्षिणी[३१७] कर्म-सुन्दरी[३१८]।
कर्म - विद्या[३१९] कर्म - गतिः[३२०], कर्म - तन्त्र - परायणा[३२१]।।६७
कर्म - मात्रा[३२२] कर्म - गात्रा[३२३], कर्म - धर्म - परायणा[३२४]।
कर्म - रेखा - नाश - कर्त्री[३२५], कर्म - रेखा - विभेदिनी[३२६]।।६८
कर्म - रेखा - मोह - करी[३२७], कर्म - कीर्ति - परायणा[३२८]।
कर्म - धात्री[३२९] कर्म-सारा[३३०], कर्माधारा[३३१] च कर्म-भूः[३३२]।।६९

कर्म-कारी[३३३] कर्म - हारी[३३४], कर्म - कौतुक - सुन्दरी[३३५]।
कर्म-काली[३३६] कर्म - तारा[३३७], कर्मच्छिन्ना[३३८] च कर्मदा[३३९]।।७०
कर्म-चाण्डालिनी[३४०] कर्म-वेद-माता[३४१] च कर्म-भूः[३४२]।
कर्म - काण्ड - रताऽनन्ता[३४३], कर्म - काण्डानुमानिता[३४४]।।७१
कर्म - काण्ड - परीणाहा[३४५], कमठी[३४६] कमठा-कृतिः[३४७]।
कमठाराध्य - हृदया[३४८], कमठा - कण्ठ - सुन्दरी[३४९-५०]।।७२
कमठासन - संसेव्या[३५१], कमठी - कर्म - तत्परा[३५२]।
करुणाकर - कान्ता[३५३] च करुणाकर - वन्दिता[३५४]।।७३
कठोरा[३५५] कर - माला[३५६] च, कठोर - कुच - धारिणी[३५७]।
कपर्दिनी[३५८] कपटिनी[३५९], कठिनी[३६०] कङ्क - भूषणा[३६१]।।७४
करभोरूः[३६२] कठिनदा[३६३], करभा[३६४] करभालया[३६५]।
कल-भाषा-मयी[३६६] कल्पा[३६७], कल्पना[३६८] कल्प-दायिनी[३६९]।।७५
कमलस्था[३७०] कला-माला[३७१], कमलास्या[३७२] क्वणत् - प्रभा[३७३]।
ककुद्मिनी[३७४] कष्टवती[३७५], कक्षा[३७६] कक्षार्चिता[३७७] कजा[३७८]।।७६
कचार्चिता[३७९] कच - तनुः[३८०], कच - सुन्दर - धारिणी[३८१]।
कठोर - कुच - संलग्ना[३८२], कटि - सूत्र - विराजिता[३८३]।।७७
कण - भक्ष-प्रिया[३८४] कन्दा[३८५], कथा[३८६] कन्द-गतिः[३८७] कविः[३८८]।
कलिघ्नी[३८९] कलि - हर्त्री[३९०] च, कवि - नायक-पूजिता[३९१]।।७८
कषा[३९२] कक्षा-नियन्त्री[३९३] च, कश्चित्-कवि-वरार्चिता[३९४]।
कर्त्री[३९५] कर्त्तृकाभूषणा[३९६], करिणी[३९७] कर्ण - शत्रुपा[३९८]।।७९
करणेशी[३९९] करणपा[४००], कलनाम्बा[४०१] कला - निधिः[४०२]।
कलना[४०३] कलनाधारा[४०४], कारिका[४०५] करका[४०६] करा[४०७]।।८०
कल - गेन्द्रा[४०८] कर्क-राशिः[४०९], कर्क-राशि-प्रपूजिता[४१०]।
कन्या-राशिः[४११] कन्यका[४१२] च, कन्यका-प्रिय-भाषिणी[४१३]।।८१
कन्यका - दान - सन्तुष्टा[४१४], कन्यका - दान - तोषिणी[४१५]।
कन्या - दान - कराऽनन्दा[४१६], कन्या - दान - ग्रहेष्टदा[४१७]।।८२

कर्षणा[४१८] कक्ष - दहना[४१९], कामिता[४२०] कमलासना[४२१]।
कर - मालानन्द - कर्त्री[४२२], कर - माला - प्रतोषिता[४२३]।।८३
कर - मालाशयानन्दा[४२४], कर - माला - समागमा[४२५]।
कर - माला - सिद्धि - दात्री[४२६], कर - मालाकर-प्रिया[४२७]।।८४
कर - प्रिया[४२८] कर - रता[४२९], कर - दान - परायणा[४३०]।
कलानन्दा[४३१] कलि-गतिः[४३२], कलि-पूज्या[४३३] कलि - प्रसूः[४३४]।।८५
कल - नाद - निनादस्था[४३५], कल - नाद - वर - प्रदा[४३६]।
कल - नाद - समाजस्था[४३७], कहोला[४३८] च कहोलदा[४३९]।।८६
कहोल - गेह - मध्यस्था[४४०], कहोल - वर - दायिनी[४४१]।
कहोल -कविताधारा[४४२], कहोल - ऋषि - मानिता[४४३]।।८७
कहोल - मानसाराध्या[४४४], कहोल - वाक्य - कारिणी[४४५]।
कर्तृ - रूपा[४४६] कर्तृ - मयी[४४७], कर्तृ - माता[४४८] च कर्तरी[४४९]।।८८
कनीया[४५०] कनकाराध्या[४५१], कनीनक - मयी[४५२] तथा।
कनीयानन्द - निलया[४५३], कनकानन्द - तोषिता[४५४]।।८९
कनीयक-करा[४५५] काष्ठा[४५६], कथार्णव-करी[४५७] करी[४५८]।
करि-गम्या[४५९] करि-गतिः[४६०], करि-ध्वज-परायणा[४६१]।।९०
करि-नाथ-प्रिया[४६२] कण्ठा[४६३], कथानक-प्रतोषिता[४६४]।
कमनीया[४६५] कमनका[४६६], कमनीय - विभूषणा[४६७]।।९१
कमनीय - समाजस्था[४६८], कमनीय - व्रत - प्रिया[४६९]।
कमनीय - गुणाराध्या[४७०], कपिला[४७१] कपिलेश्वरी[४७२]।।९२
कपिलाराध्य - हृदया[४७३], कपिला - प्रिय - दायिनी[४७४]।
कह - चक्र - मन्त्र - वर्णा[४७५], कह - चक्र - प्रसूनका[४७६]।।९३
कएईलह्रीं - स्वरूपा[४७७] च, कएईलह्रीं - वर-प्रदा[४७८]।
कएईलह्रीं - सिद्धि - दात्री[४७९], कएईलह्रीं - स्वरूपिणी[४८०]।।९४
कएईलह्रीं - मन्त्र - वर्णा[४८१], कएईलह्रीं - प्रसू - कला[४८२]।
क - वर्गजा[४८३] कपाटस्था[४८४], कपाटोद्घाटन - क्षमा[४८५]।।९५

कङ्कालीं[४८६] च कपालीं[४८७] च, कङ्काल-प्रिय-भाषिणी[४८८]।
कङ्काल - भैरवाराध्या[४८९], कङ्काल - मानस - स्थिता[४९०]।।९६
कङ्काल - मोह - निरता[४९१], कङ्काल - मोह - दायिनी[४९२]।
कलुषघ्नी[४९३] कलुषहा[४९४], कलुषार्ति - विनाशिनी[४९५]।।९७
कलि-पुष्पा[४९६] कला - दाना[४९७], कश्पिुः[४९८] कश्यपार्चिता[४९९]।
कश्यपा[५००] कश्यपाराध्या[५०१], कलि - पूर्ण - कलेवरा[५०२]।।९८
कलेवर - करी[५०३] क-च-ट - वर्गा[५०४] च करालिका[५०५]।
कराल - भैरवाराध्या[५०६], कराल - भैरवेश्वरी[५०७]।।९९
कराला[५०८] कलनाधारा[५०९], कपर्द्दीश - वर - प्रदा[५१०]।
कपर्दीश - प्रेम -लता[५११], कपर्दि - मालिका - युता[५१२]।।१००
कपर्दि - जप - मालाढ्या[५१३], करवीर - प्रसूनदा[५१४]।
करवीर - प्रिय - प्राणा[५१५], करवीर - प्रपूजिता[५१६]।।१०१
कर्णिकार - समाकारा[५१७], कर्णिकार - प्रपूजिता[५१८]।
करीषाग्नि - स्थिता[५१९] कर्षा[५२०], कर्ष - मात्र - सुवर्णदा[५२१]।।१०२
कलशा[५२२] कलशाराध्या[५२३] कषाया[५२४] करि - गानदा[५२५]।
कपिला[५२६] कल-कण्ठी[५२७] च, कलि-कल्प-लता-मता[५२८]।।१०३
कल्प-लता[५२९] कल्प-माता[५३०], कल्प-कारी[५३१] च कल्प-भूः[५३२]।
कर्पूरामोद - रुचिरा[५३३], कर्पूरामोद - धारिणी[५३४]।।१०४
कर्पूर - मालाभरणा[५३५], कर्पूर - वास - पूर्तिदा[५३६]।
कर्पूर - माला - जयदा[५३७], कर्पूरार्णव - मध्यगा[५३८]।।१०५
कर्पूर - चर्वण - रता[५३९], कटकाम्बर - धारिणी[५४०]।
कपटेश्वर - सम्पूज्या[५४१], कपटेश्वर - रूपिणी[५४२]।।१०६
कद्रुः[५४३] कपि-ध्वजाराध्या[५४४], कलाप-पुष्प - धारिणी[५४५]।
कलाप-पुष्प-रुचिरा[५४६], कलाप - पुष्प - पूजिता[५४७]।।१०७
क्रकचा[५४८] क्रकचाराध्या[५४९], कथम्ब्रूमा[५५०] करालजा[५५१]।
कथङ्कार-विनिर्मुक्ता[५५२], काली[५५३] काल-प्रिया[५५४] क्रतुः[५५५]।।१०८

कामिनी[५५६] कामिनी-पूज्या[५५७], कामिनी-पुष्प-धारिणी[५५८]।
कामिनी-पुष्प-निलया[५५९], कामिनी - पुष्प - पूर्णिमा[५६०]।।१०९
कामिनी-पुष्प-पूजार्हा[५६१], कामिनी - पुष्प - भूषणा[५६२]।
कामिनी-पुष्प - तिलका[५६३], कामिनी - कुण्ड - चुम्बना[५६४]।।११०
कामिनी - योग - सन्तुष्टा[५६५], कामिनी-योग-भोगदा[५६६]।
कामिनी-कुण्ड-सम्मग्ना[५६७], कामिनी-कुण्ड-मध्यगा[५६८]।।१११
कामिनी - मानसाराध्या[५६९], कामिनी - मान - तोषिता[५७०]।
कामिनी-मान-सञ्चारा[५७१], कालिका[५७२] काल-कालिका[५७३]।।११२
कामा[५७४] च काम-देवी[५७५] च, कामेशी[५७६] काम-सम्भवा[५७७]।
काम -भावा[५७८] काम-रता[५७९], कामार्त्ता[५८०] काम-मञ्जरी[५८१]।।११३
काम-मञ्जीर-रणिता[५८२], काम - देव - प्रियान्तरा[५८३]।
काम-काली[५८४] काम-कला[५८५], कामी[५८६] काम-कलाभिधा[५८७]।।११४
कादि - काम - कला-काली[५८८-८९], कालानल-सम - प्रभा[५९०]।
कल्पान्त-दहना[५९१] कान्ता[५९२], कान्तार-प्रिय-वासिनी[५९३]।।११५
काल-पूज्या[५९४] काल-रता[५९५], काल-माता[५९६] च कालिनी[५९७]।
काल-वीरा[५९८] काल-घोरा[५९९], काल-सिद्धा[६००] च कालदा[६०१]।।११६
कालाञ्जन - समाकारा[६०२], कालिञ्जर - निवासिनी[६०३]।
काल-ऋद्धिः[६०४] काल-वृद्धिः[६०५], कारागृह-विमोचिनी[६०६]।।११७
कादि-विद्या[६०७] कादि-माता[६०८], कादिस्था[६०९] कादि-सुन्दरी[६१०]।
काशी[६११] काञ्ची[६१२] च काञ्चीशा[६१३], काशीश-वर-दायिनी[६१४]।।११८
क्रीं-बीजा[६१५] चैव क्रां-बीजा, हृदयाय नमः स्मृता[६१६-१७]।
काम्या[६१८] काम्य-गतिः[६१९] काम्य-सिद्धि-दात्री[६२०] च काम-भूः[६२१]।।११९
कामाख्या[६२२] काम-रूपा[६२३] च, काम - चाप - विमोचिनी[६२४]।
काम-देव-कला-रामा[६२५], काम - देव - कलालया[६२६]।।१२०
काम-रात्रिः[६२७] काम-दात्री[६२८], कान्ताराचल - वासिनी[६२९]।
काल-रूपा[६३०] काल-गतिः[६३१], काम-योग - परायणा[६३२]।।१२१

काम-सम्मर्दन-रता[६३३], काम - गेह - विकासिनी[६३४]।
काल - भैरव - भार्या[६३५] च, काल - भैरव - कामिनी[६३६]।।१२२
काल - भैरव - योगस्था[६३७], काल - भैरव - भोगदा[६३८]।
काम-धेनु:[६३९] काम-दोग्ध्री[६४०], काम-माता[६४१] च कान्तिदा[६४२]।।१२३
कामुका[६४३] कामुकाराध्या[६४४], कामुकानन्द-वर्द्धिनी[६४५]।
कार्त्तवीर्या[६४६] कार्त्तिकेया[६४७], कार्त्तिकेय-प्रपूजिता[६४८]।।१२४
कार्या[६४९] कारणदा[६५०] कार्य-कारिणी[६५१] कारणान्तरा[६५२]।
कान्ति-गम्या[६५३] कान्ति-मयी[६५४], कात्या[६५५] कात्यायनी[६५६] च का[६५७]।।१२५
काम-सारा[६५८] च काश्मीरा[६५९], काश्मीराचार-तत्परा[६६०]।
काम - रूपाचार - रता[६६१], काम - रूप - प्रियम्वदा[६६२]।।१२६
काम - रूपा[६६३] काम - सिद्धा[६६४], काम - रूप-मनो-मयी[६६५]।
कार्त्तिकी[६६६] कार्त्तिकाराध्या[६६७], काञ्चनार - प्रसून - भू:[६६८]।।१२७
काञ्चनार - प्रसूनाभा[६६९], काञ्चनार - प्रपूजिता[६७०]।
काञ्च-रूपा[६७१] काञ्च-भूमि:[६७२], कांस्य-पात्र-प्रभोजिनी[६७३]।।१२८
कांस्य - ध्वनि-मयी[६७४] काम-सुन्दरी[६७५] काम-चुम्बना[६७६]।
काश - पुष्प - प्रतीकाशा[६७७], काम-द्रुम-समागमा[६७८]।।१२९
काम-पुष्पा[६७९] काम-भूमि:[६८०], काम-पूज्या[६८१] च कामदा[६८२]।
काम-देहा[६८३] काम - गेहा[६८४], काम-बीज-परायणा[६८५]।।१३०
काम - ध्वज-समारूढा[६८६], काम - ध्वज-समास्थिता[६८७]।
काश्यपी[६८८] काश्यपाराध्या[६८९], काश्यपानन्द - दायिनी[६९०]।।१३१
कालिन्दी - जल - सङ्काशा[६९१], कालिन्दी - जल - पूजिता[६९२]।
कादेव - पूजा - निरता[६९३], कादेव - परमार्थदा[६९४]।।१३२
कार्मणा[६९५] कार्मणाकारा[६९६], काम-कार्मण-कारिणी[६९७]।
कार्मण - त्रोटन - करी[६९८], काकिनी[६९९] कारणाह्वया[७००]।।१३३
काव्यामृता[७०१] च कालिङ्गा[७०२], कालिङ्ग - मर्दनोद्यता[७०३]।
कालागरु - विभूषाढ्या[७०४], कालागरु - विभूतिदा[७०५]।।१३४

कालागरु - सुगन्धा[७०६] च, कालागरु - प्रतर्पणा[७०७]।
कावेरी - नीर - सम्प्रीता[७०८], कावेरी - तीर - वासिनी[७०९]।।१३५
काल - चक्र - भ्रमाकारा[७१०], काल - चक्र-निवासिनी[७११]।
कानना[७१२] काननाधारा[७१३], कारुः[७१४] कारुणिका-मयी[७१५]।।१३६
काम्पिल्य-वासिनी[७१६] काष्ठा[७१७], काम-पत्नी[७१८] च काम-भूः[७१९]।
कादम्बरी - पान - रता[७२०], तथा कादम्बरी - कला[७२१]।१३७
काम-वन्द्या[७२२] च कामेशी[७२३], काम-राज-प्रपूजिता[७२४]।
काम - राजेश्वरी-विद्या[७२५], काम - कौतुक-सुन्दरी[७२६]।।१३८
काम्बोजजा[७२७] कांक्षितदा[७२८], कांस्य-काञ्चन-कारिणी[७२९]।
काञ्चनाद्रि - समाकारा[७३०], काञ्चनाद्रि - प्रदानदा[७३१]।।१३९
काम-कीर्तिः[७३२] कामकेशी[७३३], कारिका[७३४] कातराश्रया[७३५]।
काम-भेदी[७३६] च कामार्त्ति-नाशिनी[७३७] काम-भूमिका[७३८]।।१४०
काल-निर्णाशिनी[७३९] काव्य-वनिता[७४०] काम-रूपिणी[७४१]।
कायस्था[७४२] काम-सन्दीप्तिः[७४३], काव्यदा[७४४] काल-सुन्दरी[७४५]।।१४१
कामेशी[७४६] कारण-वरा[७४७], कामेशी - पूजनोद्यता[७४८]।
काञ्ची - नूपुर - भूषाढ्या[७४९], कुंकुमाभरणान्विता[७५०]।।१४२
काल-चक्रा[७५१] काल-गतिः[७५२], काल-चक्र-मनोभवा[७५३]।
कुन्द-मध्या[७५४] कुन्द-पुष्पा[७५५], कुन्द-पुष्प-प्रिया[७५६] कुजा[७५७]।।१४३
कुज-माता[७५८] कुजाराध्या[७५९], कुठार-वर-धारिणी[७६०]।
कुञ्जरस्था[७६१] कुश-रता[७६२], कुशेशय-विलोचना[७६३]।।१४४
कुलटी[७६४] कुररी[७६५] क्रुद्धा[७६६], कुरङ्गी[७६७] कुटजाव्हया[७६८]।
कुम्भीनस - विभूषा[७६९] च, कुम्भीनस - वधोद्यता[७७०]।।१४५
कुम्भ-कर्ण-मनोल्लासा[७७१], कुल-चूडामणिः[७७२] कुला[७७३]।
कुलाल-गृह-कन्या[७७४] च, कुल - चूडामणि - प्रिया[७७५]।।१४६
कुल-पूज्या[७७६] कुलाराध्या[७७७], कुल-पूजा-परायणा[७७८]।
कुल-भूषा[७७९] तथा कुक्षिः[७८०], कुररी-गण-सेविता[७८१]।।१४७

कुल-पुष्पा[७८२] कुल-रता[७८३], कुल-पुष्प-परायणा[७८४]।
कुल-वस्त्रा[७८५] कुलाराध्या[७८६], कुल-कुण्ड-सम-प्रभा[७८७]।।१४८
कुल-कुण्ड-समोल्लासा[७८८], कुण्ड-पुष्प-परायणा[७८९]।
कुण्ड-पुष्प-प्रसन्नास्या[७९०], कुण्ड-गोलोद्भवात्मिका[७९१]।।१४९
कुण्ड-गोलोद्भवाधारा[७९२], कुण्ड-गोल-मयी[७९३] कुहूः[७९४]।
कुण्ड-गोल-प्रिय-प्राणा[७९५], कुण्ड-गोल-प्रपूजिता[७९६]।।१५०
कुण्ड-गोल-मनोल्लासा[७९७], कुण्ड-गोल-वर-प्रदा[७९८]।
कुल-देव-रता[७९९] कुण्ड्क[८००], कुल-सिद्धि-करा-परा[८०१]।।१५१
कुल-कुण्ड-समाकारा[८०२], कुल-कुण्ड-समान-भूः[८०३]।
कुण्ड-सिद्धि[८०४]: कुण्ड-ऋद्धिः[८०५], कुमारी-पूजनोद्यता[८०६]।।१५२
कुमारी - पूजक - प्राणा[८०७], कुमारी - पूजकालया[८०८]।
कुमारी - काम - सन्तुष्टा[८०९], कुमारी-पूजनोत्सुका[८१०]।।१५३
कुमारी - व्रत-सन्तुष्टा[८११], कुमारी-रूप-धारिणी[८१२]।
कुमारी-भोजन-प्रीता[८१३], कुमारी[८१४] च कुमार-दा[८१५]।।१५४
कुमार-माता[८१६] कुलदा[८१७], कुल-योनिः[८१८] कुलेश्वरी[८१९]।
कुल-लिङ्गा[८२०] कुलानन्दा[८२१], कुल-रम्या[८२२] कुतर्क-धृक्[८२३]।।१५५
कुन्ती[८२४] च कुल-कान्ता[८२५] च, कुल-मार्ग-परायणा[८२६]।
कुल्ला[८२७] च कुरु-कुल्ला[८२८] च, कुल्लुका[८२९] कुल-कामदा[८३०]।।१५६
कुलिशाङ्गी[८३१] कुब्जिका[८३२] च, कुब्जिकानन्द-वर्द्धिनी[८३३]।
कुलीना[८३४] कुञ्जर-गतिः[८३५], कुञ्जरेश्वर-गामिनी[८३६]।।१५७
कुल-पाली[८३७] कुल-वती[८३८], तथैव कुल-दीपिका[८३९]।
कुल-योगेश्वरी[८४०] कुण्डा[८४१], कुंकुमारुण-विग्रहा[८४२]।।१५८
कुंकुमानन्द - सन्तोषा[८४३], कुंकुमार्णव - वासिनी[८४४]।
कुसुमा[८४५] कुसुम-प्रीता[८४६], कुल-भूः[८४७] कुल-सुन्दरी[८४८]।।१५९
कुमुद्वती[८४९] कुमुदिनी[८५०], कुशला[८५१] कुलटालया[८५२]।
कुलटालय - मध्यस्था[८५३], कुलटा - सङ्ग - तोषिता[८५४]।।१६०

कुलटा-भुवनोद्युक्ता[८५५], कुशावर्त्ता[८५६] कुलार्णवा[८५७]।
कुलार्णवाचार-रता[८५८], कुण्डली[८५९] कुण्डलाकृतिः[८६०]।।१६१
कु-मती[८६१] च कुल-श्रेष्ठा[८६२], कुल-चक्र-परायणा[८६३]।
कूटस्था[८६४] कूट-दृष्टिश्च[८६५], कुन्तला[८६६] कुन्तलाकृतिः[८६७]।।१६२
कुशलाकृति-रूपा[८६८] च, कूर्च - बीज-धरा[८६९] च कूः[८७०]।
कुं-कुं-कुं-कुं-शब्द-रता[८७१], क्रूं-क्रूं-क्रूं-क्रूं-परायणा[८७२]।।१६३
कुंकुंकुं-शब्द-निलया[८७३], कुक्कुरालय - वासिनी[८७४]।
कुक्कुरासङ्ग - संयुक्ता[८७५], कुक्कुरान्त - विग्रहा[८७६]।।१६४
कूर्चारम्भा[८७७] कूर्च - बीजा[८७८], कूर्च - जाप - परायणा[८७९]।
कुलिनी[८८०] कुल-संस्थाना[८८१], कूर्च - कण्ठ-परा-गतिः[८८२]।।१६५
कूर्च - बीजं-भाल-देशा[८८३], कूर्च-मस्तक-भूषिता[८८४]।
कुल-वृक्ष-गता[८८५] कूर्मा[८८६], कूर्माचल-निवासिनी[८८७]।।१६६
कुल-विन्दुः[८८८] कुल-शिवा[८८९], कुल-शक्ति-परायणा[८९०]।
कुल-विन्दु-मणि-प्रख्या[८९१], कुंकुम-द्रुम-वासिनी[८९२]।।१६७
कुच - मर्दन - सन्तुष्टा[८९३], कुच - जप - परायणा[८९४]।
कुच - स्पर्शन - सन्तुष्टा[८९५], कुचालिङ्गन - हर्षदा[८९६]।।१६८
कु-गतिघ्नी[८९७] कुबेरार्चा[८९८], कुच-भूः[८९९] कुल-नायिका[९००]।
कु-गायना[९०१] कुच-धरा[९०२], कु-माता[९०३] कुन्द-दन्तिनी[९०४]।।१६९
कु-गेया[९०५] कुहराभासा[९०६], कु-देया[९०७] कुघ्न-दारिका[९०८]।
कीर्तिः[९०९] किरातिनी[९१०] क्लिन्ना[९११], किरणा[९१२] किन्नरी-क्रिया[९१३]।।१७०
क्रीं-कारा[९१४] क्रीं-जपासक्ता[९१५], क्रां-क्रीं-क्रूं-मन्त्र-रूपिणी[९१६]।
क्रिर्म्मीरितदृशापाङ्गी[९१७], किशोरी[९१८] च किरीटिनी[९१९]।।१७१
कीट-भाषा[९२०] कीट-योनिः[९२१], कीट-माता[९२२] च कीटदा[९२३]।
किंशुका[९२४] कीर-भाषा[९२५] च, क्रिया-सारा[९२६] क्रिया-वती[९२७]।।१७२

कीं-कीं-शब्द-परा[१२८] क्लांक्लींक्लूंक्लैंक्लौं-मन्त्र-रूपिणी[१२९]।
क्रांक्रींक्रूंक्रैं-स्वरूपा[१३०] च, क्रः फट्-मन्त्र-स्वरूपिणी[१३१]।।१७३
केतकी - भूषणानन्दा[१३२], केतकी - भरणान्विता[१३३]।
कै-करा[१३४] केशिनी[१३५] केशी[१३६], केशी-सूदन-तत्परा[१३७]।।१७४
केश-रूपा[१३८] केश-मुक्ता[१३९], कैकेयी[१४०] कौशिकी[१४१] तथा।
कैरवा[१४२] कैरवाह्लादा[१४३], केशरा[१४४] केतु-रूपिणी[१४५]।।१७५
केशवाराध्य - हृदया[१४६], केशवासक्त - मानसा[१४७]।
क्लैव्य-विनाशिनी[१४८] क्लीं च, क्लैं-वीज-जप-तोषिता[१४९]।।१७६
कौशल्या[१५०] कोशलाक्षी[१५१] च, कोशा[१५२] च कोमला[१५३] तथा।
कोलापुर - निवासा[१५४] च, कोलासुर - विनाशिनी[१५५]।।१७७
कोटि-रूपा[१५६] कोटि-रता[१५७], क्रोधिनी[१५८] क्रोध-रूपिणी[१५९]।
केका[१६०] च कोकिला[१६१] कोटिः[१६२], कोटि-मन्त्र-परायणा[१६३]।।१७८
कोट्यनन्त-मन्त्र-रूपा[१६४], कै-रूपा[१६५] केरलाश्रया[१६६]।
केरलाचार - निपुणा[१६७], केरलेन्द्र - गृह - स्थिता[१६८]।। १७९
केदाराश्रम - संस्था[१६९] च, केदारेश्वर - पूजिता[१७०]।
क्रोध-रूपा[१७१] क्रोध-पदा[१७२], क्रोध-माता[१७३] च कौशिकी[१७४]।।१८०
कोदण्ड-धारिणी[१७५] क्रौञ्चा[१७६], कौशिल्या[१७७] कौल-मार्गगा[१७८]।
कौलिनी[१७९] कौलिकाराध्या[१८०], कौलिकागार-वासिनी[१८१]।।१८१
कौतुकी[१८२] कौमुदी[१८३] कौला[१८४], कौमारी[१८५] कौरवार्चिता[१८६]।
कौण्डिन्या[१८७] कौशिकी[१८८] क्रोध-ज्वाला-भास्वर-रूपिणी[१८९]।।१८२
कोटि-कालानल-ज्वाला[१९०], कोटि-मार्तण्ड-विग्रहा[१९१]।
कृत्तिका[१९२] कृष्ण-वर्णा[१९३] च, कृष्णा[१९४] कृत्या-क्रियातुरा[१९५]।।१८३
कृशाङ्गी[१९६] कृत-कृत्या[१९७] च, क्रःफट्-स्वाहा-स्वरूपिणी[१९८]।
क्रोंक्रौंहूंफट्-मन्त्र-वर्णा[१९९], क्रींह्रींहूं फट् नमः स्वधा[२००]।
क्रीं-क्रीं ह्रीं-ह्रीं तथा हूं-हूं, फट् स्वाहा-मन्त्र-रूपिणी[२००१]। १८४

।। फल-श्रुति।।

इति श्रीसर्व - साम्राज्य - मेधा - नाम-सहस्त्रकम्।
सुन्दरी - शक्ति - दानाख्यं, स्वरूपाभिधमेव च।।१
कथितं दक्षिणा-काल्याः, सुन्दर्य्यै प्रीति-योगतः।
वरदान - प्रसङ्गेन, रहस्यमपि दर्शितम्।।२
गोपनीयं सदा भक्त्या, पठनीयं परात्परम्।
प्रातर्मध्याह्न - काले च, सन्ध्यार्द्ध - रात्रयोरपि।।३
पूजा - काले जपान्ते च, पठनीयं विशेषतः।
यः पठेत् साधको धीरः, काली - रूपो हि वर्षतः।।४
पठेद्वा पाठयेद्वाऽपि, शृणोति श्रावयेदपि।
वाचकं तोषयेद्वापि, स भवेत् कालिका-तनुः।।५
स - हेलं वा स - लीलं वा, यश्चैनं मानवः पठेत्।
सर्व - दुःख-विनिर्मुक्तः, त्रैलोक्य-विजयी कविः।।६
मृत-वन्ध्या काक-वन्ध्या, कन्या-वन्ध्या च वन्ध्यका।
पुष्प-वन्ध्या शूल-वन्ध्या, शृणुयात् स्तोत्रमुत्तमम्।।७
सर्व - सिद्धि-प्रदातारं, सत्कविं चिर-जीवितम्।
पाण्डित्यं कीर्ति - संयुक्तं, लभते नाऽत्र संशयः।।८
यं यं काममुपस्कृत्य, कालीं ध्यात्वा जपेत् स्तवम्।
तं तं कामं करे कृत्वा, मन्त्री भवति नाऽन्यथा।।९

फल-श्रुति का जो अंश अब प्रारम्भ होता है, वह उतना महिमा-परक नहीं है, जितना कि विधि-परक। अतः इसका पाठ करना आवश्यक नहीं है। इस अंश में जो विधियाँ बताई गई हैं, उनको श्रीगुरु-मुख से समझकर ही अपनाना चाहिए। पुस्तक में पढ़कर कदापि कोई साधना न करनी चाहिए।—सं०

योनि - पुष्पैर्लिङ्ग-पुष्पैः, कुण्ड - गोलोद्भवैरपि।
संयोगामृत - पुष्पैश्च, वस्त्र - देवी -प्रसूनकैः।।
काली-पुष्पैः पीठ - तोयैर्योनि-क्षालन-तोयकैः।
कस्तूरी-कुंकुमैः देवि!, नख - कालागरु-क्रमात्।।

अष्ट - गन्धैः धूप-दीपैः, जवा-यावक-संयुतैः।
रक्त - चन्दन-सिन्दूरैः, मत्स्य-मांसादि-भूषणैः।।
मधुभिः पायसैः क्षीरैः, शोधितैः शोणितैरपि।
महोपचारै रक्तैश्च, नैवेद्यैः सुरसान्वितैः।।
पूजयित्वा महा-कालीं, महा-कालेन लालिताम्।
विद्या-राज्ञीं कुल्लुकां च, जप्त्वा स्तोत्रं पठेच्छिवे!।।
काली-भक्तस्त्वेक-चित्तः, सिन्दूर-तिलकान्वितः।
ताम्बूल-पूरित-मुखो, मुक्त-केशो दिगम्बरः।।
शव-योनि-स्थितो वीरः, श्मशान-सुरतान्वितः।
शून्यालये विन्दु-पीठे, पुष्पाकीर्णे शिवा-वने।।
शयानोत्थ - प्रभुञ्जानः, काली - दर्शनमाप्नुयात्।
तत्र यद्यत् कृतं कर्म, तदनन्त-फलम् भवेत्।।
ऐश्वर्य्ये कमला साक्षात्, सिद्धौ श्रीकालिकाम्बिका।
कवित्वे तारिणी-तुल्यः, सौन्दर्ये सुन्दरी - समः।।
सिन्धोर्धारा-समः कार्य्ये, श्रुतौ श्रुति-धरो यथा।
वज्रास्त्र इव दुर्द्धर्षः, त्रैलोक्य-विजयास्त्र-भृत्।।
शत्रु-हन्ता काव्य-कर्त्ता, भवेच्छिव-समः कलौ।
दिग्-विदिक्-चन्द्रकर्त्ता च, दिवा-रात्रि-विपर्ययी।।
महादेव-समो योगी, त्रैलोक्य-स्तम्भकः क्षणात्।
गाने तु तुम्बुरुः साक्षाद्, दाने कर्ण-समो भवेत्।।
गजाऽश्व - रथ - पत्तीनामस्त्राणामधिपः कृती।
आयुष्ये तु भुशुण्डी च, जरा-पलित-वर्जितः।।
वर्ष-षोडशवान् भूयात्, सर्व - काले महेश्वरि!।
ब्रह्माण्ड - गोले देवेशि!, न तस्य दुर्लभं क्वचित्।।
सर्वं हस्त - गतं भूयान्नात्र कार्या विचारणा।
कुल-पुष्प-युतं दृष्ट्वा, तत्र कालीं विचिन्त्य च।।

विद्या - राज्ञीं तु संजप्य, पठेन्नाम - सहस्त्रकम्।
मनोरथ-मयी सिद्धिः, तस्य हस्ते सदा भवेत्।।
कालीं सञ्चिन्त्य प्रजपेत्, पठेन्नाम - सहस्रकम्।
सर्व-सिद्धीश्वरो भूयाद्, वाञ्छा-सिद्धीश्वरो भवेत् ।।
मृद्वचूडकयोर्योनि - त्वचि वा कोमले शिवे!।
विष्टरे शव-वस्त्रे वा, पुष्प-वस्त्रासनेऽपि वा।।
मुक्त - केशो दिगावासो, मैथुनी शयने स्थितः।
जप्त्वा कालीं पठेत् स्तोत्रं, खेचरी-सिद्धि-भाग् भवेत् ।।
चिकुरं योगमासाद्य, शुक्रोत्सारणमेव च।
जप्त्वा श्रीदक्षिणां कालीं, शक्ति -पात-शतं भवेत्।।
लतां स्पृशन् जपित्वा च, रमित्वा त्वर्च्चयन्नपि।
आलोकयन् दिगावासां, पर-शक्तिं विशेषतः।।
स्तुत्वा श्रीदक्षिणां कालीं, योनिं स्व-करगां चरेत्।
पठेन्नाम-सहस्रं यः, स शिवादधिको भवेत्।।
लतान्तरेषु जप्तव्यं, स्तुत्वा कालीं निराकुलः।
दशावधानो भवति, मास-मात्रेण साधकः।।
काल-रात्र्यां महा-रात्र्यां, वीर-रात्र्यामपि प्रिये!।
मोह-रात्र्यां चतुर्दश्यामष्टम्यां संक्रमेऽपि वा।।
कुहू - पूर्णेन्दु - शुक्रेषु, भौमामायां निशा-मुखे।
नवम्यां मङ्गल-दिने, तथा कुल-तिथौ शिवे!।।
कुलर्क्षे तु प्रयत्नेन, पठेन्नाम - सहस्रकम्।
सुदर्शनो भवेदाशु, किन्नरी-सिद्धि-भाग् भवेत् ।।
पश्चिमाभिमुखं लिङ्गं, वृष - शून्यं पुरातनम्।
तत्र स्थित्वा जपेत् स्तोत्रं, सर्व-कामाप्तये शिवे! ।।
भौम-वारे निशीथे वा, अमावास्या - दिने शुभे।
माष-भक्त-बलिं छागं, कृशरान्नं च पायसम्।।

दग्ध-मीनं शोणितं च, दधि-दुग्ध-गुडार्द्रकम्।
बलिं दत्वा जपेत् तत्र, त्वष्टोत्तर-सहस्रकम्।।
देव - गन्धर्व-सिद्धौघैः, सेवितां सुर - सुन्दरीम्।
लभेद् देवेशि ! मासेन, तस्य चासन-संहतिः।।
हस्त - त्रयं भवेदूर्ध्वं, नात्र कार्या विचारणा।
हेलया लीलया भक्त्या, कालीं स्तौति नरस्तु यः।।
ब्रह्मादीं स्तम्भयेद् देवि!, माहेशीं मोहयेत् क्षणात्।
आकर्षयेन् महा-विद्यां, दश-पूर्वाः त्रि-यामतः।।
कुर्वीत विष्णु - निर्माणं, यमादीनां तु मारणम्।
ध्रुवमुच्चाटयेच्छत्रून् , सृष्टिं च नूतनां चरेत्।।
मेष - माहिष - मार्जार - खर-च्छाग-नरादिकैः।
खड्गी-शूकर-कापोतैष्टिट्टिभैः शशकैः पलैः।।
शोणितैः सास्थि-मांसैश्च, कारण्डैर्दुग्ध-पायसैः।
कादम्बरी-सिन्धु-मद्यैः, सुरारिष्टैश्च सासवैः।।
योनि - क्षालित-तोयैश्च, योनि - लिङ्गामृतैरपि।
स्व-जात-कुसुमैः पूज्य, जपान्ते तर्पयेच्छिवाम्।।
सर्व-साम्राज्य-नाम्ना तु, स्तुत्वा नत्वा स्व-शक्तितः।
दक्षिणा-कालिका तस्य, गेहे तिष्ठति नाऽन्यथा।।
वेश्या-कन्या तथा पीठ-जाति-भेदे कुल-क्रमात्।
अकुल-क्रम-भेदेन, ज्ञात्वैव तु कुमारिकाम्।।
कुमारीं पूजयेद् भक्त्या, जपान्ते देव-वत्प्रिये!।
पठेन्नाम-सहस्रं यः, काली-दर्शन-भाग्भवेत्।।
भक्त्या पूज्य कुमारीं तु, वेश्या - कुल - समुद्भवाम्।
वस्त्र-हेमादिभिस्तोष्य, जप्त्वा स्तोत्रं पठेच्छिवे!।।
त्रैलोक्य - विजयी भूयादमा - चन्द्र - प्रदर्शकः।
यद्यद् दत्तं कुमार्यै तु, तदनन्त - फलं भवेत्।।

कुमारी - पूजन - फलं, मया वक्तुं न शक्यते।
चाञ्चल्याद् गदितं किञ्चित्, क्षम्यतामयमञ्जलिः।।
एका चेत्पूजिता बाला, द्वितीया पूजिता भवेत्।
कुमार्यः शक्तयश्चैव, सर्वमेतच्चराचरम्।।
शक्तिमानीय तद्-गात्रे, न्यास - जालं प्रविन्यसेत्।
वाम - भागे च संस्थाप्य, पठेन्नाम - सहस्रकम्।।
सर्व - सिद्धीश्वरो भूयान्नात्र कार्या विचारणा।
श्मशानस्थो भवेत्स्वस्थो, गलितं चिकुरं चरेत्।।
दिगम्बरः सहस्रं च, सूर्य - पुष्पं समानयेत्।
स्व-वीर्येण युतं कृत्वा, प्रत्येकं प्रजपन् हुनेत्।।
पूज्य ध्यात्वा महा-भक्त्या, क्षमा-पालो नरः पठन्।
नखं केशं स्व-वीर्यञ्च, यद्यत्सम्मार्जनी-गतम्।।
मुक्त-केशो दिशा-वासो, मूल-मन्त्र-पुरःसरम्।
कुज-वारे मध्य-रात्रौ, होमं कृत्वा श्मशानके।।
पठेन्नाम - सहस्त्रं यः, पृथ्वीशाकर्षणं चरेत्।
पुष्प - युक्ते भगे देवि!, संयोगानन्द-तत्परः।।
पुनश्चिकुरमासाद्य, मूल - मन्त्रं जपन् शिवे!।
चिता-वह्नौ मध्य - रात्रे, वीर्यमुत्सार्य यत्नतः।।
कालिकां पूजयेत्तत्र, पठेन्नाम - सहस्त्रकम्।
पृथ्वीशाकर्षणं कुर्यान्नात्र कार्या विचारणा।।
कदली - वनमासाद्य, लक्ष - मन्त्रं जपेन्नरः।
मधुमत्या स्वयं देव्या, सेव्यमानः स्मरोपमः।।
म्रीं मधुमतीत्युक्त्वा च, तथा स्थावर-जङ्गमम्।
आकर्षिणीं समुच्चार्य, ठ ठ स्वाहा समुच्चरेत्।।
त्रैलोक्याकर्षिणी विद्या, तस्य हस्ते सदा भवेत्।
नदीं पुरीं च रत्नानि, हेम-स्त्री-शैल-भू-रुहान्।।

आकर्षयत्यम्बु - निधिं, सुमेरुं च दिगन्ततः।
अलभ्यानि च वस्तूनि, दूराद् भूमि - तलादपि।।
वृत्तान्तं च सुर - स्थानाद्, रहस्यं विदुषामपि।
राज्ञां च कथयत्येषा, सत्यं सत्त्वरमादिशेत्।।
द्वितीय - वर्ष - पाठेन, भवेत् पद्मावती-पतिः।
ॐ ह्रीं पद्मावति-पदं, ततस्त्रैलोक्य - नाम च।।
वार्त्तां च कथय - द्वन्द्वं, स्वाहान्तो मन्त्र ईरितः।
ब्रह्म-विष्णवादिकानां च, त्रैलोक्ये यादृशी भवेत्।।
सर्वं वदति देवेशि!, त्रिकालज्ञः कवि शुभः।
त्रि - वर्षं पठतो देवि!, लभेद्-भोग-वतीं कलाम्।।
महा - कालेन दृष्टोऽपि, चिता -मध्य-गतोऽपि च।
तस्य दर्शन - मात्रेण, चिरञ्जीवी नरो भवेत्।।
मृत - सञ्जीविनीत्युक्त्वा, मृतमुत्थापय - द्वयं।
स्वाहान्तो मनुराख्यातो, मृत - सञ्जीवनात्मकः।।
चतुर्वर्षं पठेद्यस्तु, स्वप्न - सिद्धिस्ततौ भवेत्।
ॐ ह्रीं स्वप्न-वाराहि कालि स्वप्ने कथयोच्चरेत्।।
अमुकस्यामुकं देहि, क्रीं स्वाहान्तो मनुर्मतः।
स्वप्न-सिद्धा चतुर्वर्षात्तस्य स्वप्ने सदा स्थिता।।
चतुर्वर्षस्य पाठेन, चतुर्वेदाधिपो भवेत्।
तद्धस्त - तल - संयोगान्, मूर्खः काव्यं करोति च।।
तस्य वाक्य-परिचयान्, मूर्तिर्विन्दति काव्यताम्।
मस्तके तु करं दत्त्वा, वद वाणीमिति ब्रुवन्।।
साधको वाञ्छां यत्कुर्यात्तत्तथैव भविष्यति।
ब्रह्माण्ड-गोलके याश्च, याः काश्चिज्जगती-तले।।
समस्ताः सिद्धयो देवि!, करामलक - वत् सदा।
साधक-स्मृति-मात्रेण, यावन्त्यः सन्ति सिद्धयः।।

स्वयमायान्ति पुरतो, जपादीनां तु का कथा।
विदेश - वर्तिनो भूत्त्वा, वर्तन्ते चेटका इव।।
अमायां चन्द्र - सन्दर्शश्चन्द्र - ग्रहणमेव च।
अष्टम्यां पूर्ण - चन्द्रत्वं, चन्द्र - सूर्याष्टकं तथा।।
अष्ट - दिक्षु तथाऽष्टौ च, करोत्येव महेश्वरि!।
अणिमादि - खेचरत्वं, चराचरा - पुरी - गतिः।।
पादुका-खड्ग - वेताल - यक्षिणी - गुह्यकादयः।
तिलको गुप्तता - दृश्यं, चराचर - कथानकम्।।
मृत - सञ्जीविनी - सिद्धिः, गुटिका च रसायनम्।
उड्डीन-सिद्धिः देवेशि!, षष्टि-सिद्धीश्वरत्वकम्।।
तस्य हस्ते वसेद् देवि!, नात्र कार्या विचारणा।
केतौ व दुन्दुभौ वस्त्रे, विताने वेष्टने गृहे।।
भित्तौ च फलके देवि!, लेख्यं पूज्यं प्रयत्नतः।
मध्ये चक्रं दशाङ्गोक्तं, परितो नाम - लेखनम्।।
तद्धारणान् महेशानि!, त्रैलोक्य - विजयी भवेत्।
एको हि शत - साहस्रान्निर्जित्य च रणाङ्गणे।।
पुनरायाति च सुखं, स्व - गृहं प्रति पार्वति!।
एको हि शत - सन्दर्शी, लोकानां भवति ध्रुवम्।।
कलशं स्थाप्य यत्नेन, नाम - साहस्रकं पठेत्।
सेकः कार्यो महेशानि!, सर्वापत्ति - निवारणे।।
भूत - प्रेत - ग्रहादीनां, रक्षसां ब्रह्म - राक्षसाम्।
वेतालानां भैरवाणां, स्कन्द - वैनायकादिकान्।।
नाशयेत्क्षण - मात्रेण, नात्र कार्या विचारणा।
भस्माभिमन्त्रितं कृत्त्वा, ग्रह - ग्रस्तं विलेपयेत्।।
भस्म - संक्षेपणादेव, सर्व - ग्रह - विनाशनम्।
नवनीतं चाभिमन्त्र्य, स्त्रीभ्यो दद्यान् महेश्वरि!।।

बन्ध्या - पुत्र - प्रदं देवि!, नात्र कार्या विचारणा।
कण्ठे वा वाम - बाहौ वा, योनौ वा धारिणाच्छिवे!।।
बहु - पुत्र - वती नारी, सुभगा जायते ध्रुवम्।
पुरुषो दक्षिणाङ्गे तु, धारयेत् सर्व - सिद्धये।।
कण्ठे बाहौ च शिरसि, हृदये नाभि - गोचरे।
कटि-स्थाने शिखायां च, धारयेत् सर्व-सिद्धये।।
बलवान् कीर्त्तिमान् धन्यो, धार्मिकः साधकः कृती।
बहु - पुत्रो रथानां च, गजानामधिपः सुधीः।।
कामिनी-कर्षणोद्युक्तः, क्रीं च दक्षिणे कालिके।
क्रीं स्वाहा प्रजपेन्मन्त्रमयुतं नाम - पाठकः।।
आकर्षणं चरेद् देवि!, जल-खेचर-भू - गतान्।
वशीकरण - कामो हि, हूं हूं ह्रीं ह्रीं च दक्षिणे।।
कालिके पूर्व - वीजानि, पूर्व - वत् प्रजपन् पठेत्।
उर्वशीमपि वशयेन्नात्र कार्या विचारणा।।
क्रीं च दक्षिणे कालिके, स्वाहा-युक्तं जपेन्नरः।
पठेन्नाम - सहस्रं तु, त्रैलोक्यं मारयेद् ध्रुवम्।।
सद्-भक्ताय प्रदातव्या, विद्या-राज्ञी शुभे दिने।
सद्विनीताय शान्ताय, दान्तायाति - गुणाय च।।
भक्ताय ज्येष्ठ-पुत्राय, गुरु - भक्ति - पराय च।
भक्त-भक्ताय योग्याय, शक्ति-भक्ति-पराय च।।
वैष्णवाय विशुद्धाय, शिवा-बलि-रताय च।
वेश्या-पूजन - युक्ताय, कुमारी - पूजकाय च।।
दुर्गा - भक्ताय शैवाय, महा - काल - प्रजापिने।
अद्वैत-भाव-युक्ताय, काली-भक्ति - पराय च।।
देयं सहस्त्र - नामाख्यं, स्वयं काल्या प्रकाशितम्।
गुरु - दैवत - मन्त्राणां, महेशस्यापि पार्वति!।।

अभेदेन स्मरेन्मन्त्रं, स शिवः स गणाधिपः।
यो एवं भावयेन्मन्त्रं, स शिवो नात्र संशयः।।
स शाक्तो वैष्णवस्सौरः, स एव गणाधिपः।
अयोग्याय न दातव्यं, सिद्धि - रोधः प्रजायते।।
वेश्या - स्त्री - निन्दकाय, सुरा-संवित् प्रनिन्दके।
सुरा-मुखी मनुं स्मृत्वा, सुराचार्यो भविष्यति।।
स्वके वाग्देवता घोरे, परम - घोरे हूं वदेत्।
घोर - रूपे घोर - दंष्ट्रे, भीम - मुखि पदं वदेत्।।
भीषण्यमुक - षष्ठ्यन्तं, हेतु रम - युगं वदेत्।
शिव-वह्नि - युगास्त्रं च, हूं हूं फट् च मनुर्भवेत्।।
एतस्य स्मरणादेव, दुष्टानां च मुखे सुरा।
अवतीर्णा भवेद् देवि!, दुष्टानां भद्र - नाशिनी।।
खलाय पर - तन्त्राय, पर - निन्दा - पराय च।
भ्रष्टाय दुष्ट - सत्त्वाय, पर-वाद-रताय च।।
शिवाभक्ताय दुष्टाय, पर - दार - रताय च।
न स्तोत्रं दर्शयेद् देवि!, ब्रह्म - हत्या-करो भवेत्।।
कालिकानन्द-हृदयः, कालिकासक्त - मानसः।
काली-भक्तो भवेद्यो हि, धन्य - रूपः स एव तु।।
कलौ काली कलौ काली, कलौ काली वर-प्रदा।
कलौ काली कलौ काली, कलौ काली तु केवला।।
बिल्व - पत्र - सहस्राणि, करवीराणि वै तथा।
प्रति - नाम्ना पूजयेद्धि, तेन काली वर-प्रदा।।
कमलानां सहस्रं तु, प्रति - नाम्ना समर्पयेत्।
चक्रं सम्पूज्य देवेशि!, कालिका-वरमाप्नुयात्।।
मन्त्र - क्षोभ - युतं देवि!, कलशस्य जलेन तु।
नाम्ना प्रसेचयेद् देवि!, सर्व-क्षोभ-विनाश-कृत्।।

तथा दमनकं देवि!, सहस्रमाहरेद् व्रती।
सहस्र - नाम्ना सम्पूज्य, काली - वरमाप्नुयात्।।
चक्रं विलिख्य देहस्थं, धारयेत् कालिका-तनुः।
काल्यै निवेदितं यद्यत्तदंशं भक्षयेच्छिवे!।।
दिव्य-देह-धरो भूत्वा, काली-देहे स्थिता भवेत्।
नैवेद्य-निन्दकान् दुष्टान् , दृष्ट्वा नृत्यन्ति भैरवाः।।
योगिन्यश्च महा-वीरा, रक्त-पानोद्यताः प्रिये!।
